# Rishi Agastyaproktam Shivarchanopadesham 2

# ઋષિ અગસ્ત્યપ્રોક્તં શિવાર્ચનોપદેશમ્ ૨

## Document Information

Text title : Rishi Agastyaproktam Shivarchanopadesham 2

File name : shivArchanopadesham2.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 27 madhyArjunamahimAnuvarNanam | 740-748||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 16, 2024

*sanskritdocuments.org*

Rishi Agastyaproktam Shivarchanopadesham 2

# ઋષિ અગસ્ત્યપ્રોક્તં શિવાર્ચનોપદેશમ્ ૨

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

અગસ્ત્યઃ

અતો યં કામમુદ્દિશ્ય યઃ શિવમ્પૂજયિષ્યતિ ।
સ તં કામમવાપ્નોતિ તતોઽધિકમપિ ધ્રુવમ્ ॥ ૭૪૦॥

યેઽર્ચયન્તિ મહાદેવં સાવધાનેન સન્તતમ્ ।
તે સમૃદ્ધા ભવન્ત્યેવ પુત્રદારધનાદિભિઃ ॥ ૭૪૧॥

અપ્રાપ્યં નાસ્તિ શૈવેન્દ્ર શ્રીમહાદેવપૂજયા ।
શ્રીમહાદેવમારાધ્ય કો વા ન સુખમેધતે ॥ ૭૪૨॥

નિત્યમવ્યભિચારિણ્યા ભક્ત્યા પૂજ્યોમહેશ્વરઃ ।
દુર્લભા તાદૃશી ભક્તિર્યતઃ સર્વાર્થદાયિની ॥ ૭૪૩॥

કિં કામધેનુભિર્વિપ્ર કિં કલ્પતરુકોટિભિઃ ।
યદિ ભક્તિર્મહાદેવે સર્વસમ્પત્પ્રદાયિની ॥ ૭૪૪॥

યદિ ભક્તિર્મહાદેવે ભક્તિતરવ્યભિચારિણી ।
તદેન્દ્રોપેન્દ્રચન્દ્રાદ્યા ગણનીયા ન સર્વથા ॥ ૭૪૫॥

સમ્પ્રાપ્ય શામ્ભવીં ભક્તિ ગણયિષ્યતિ કઃ સુરાન્ ।
શિવેતરામરાઃ સર્વે યતઃ શઙ્કરકિઙ્કરાઃ ॥ ૭૪૬॥

દેવોત્તમં મહાદેવમાશ્રિત્યાપ્યન્યદૈવતમ્ ।
કઃ સમારાધયેત્પ્રાજ્ઞો ધનીનિર્ધનિનો ધનમ્ ॥ ૭૪૭॥

યેઽભિવાઞ્છન્તિ સતતમૈહિકામુષ્મિકં ફલમ્ ।
તેષાં સદા શિવાદન્યઃ પૂજ્યો ન ભવતિ ધ્રુવમ્ ॥ ૭૪૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિ અગસ્ત્યપ્રોક્તં શિવાર્ચનોપદેશં ૨ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૭ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । ૭૪૦-૭૪૮॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 27 madhyArjunamahimAnuvarNan
. 740-748..

Notes:

Ṛṣi Agastya ઋષિ અગસ્ત્ય; delivers Upadeśa ઉપદેશ as an iteration about worshiping Śiva શિવ.

Proofread by Ruma Dewan

---

*Rishi Agastyaproktam Shivarchanopadesham 2*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*